

पञ्चरत्नस्तुतिः ॥

सव्याख्या

अप्पयदीक्षितैर्विरचिता ॥

॥ श्रीः ॥

॥ पञ्चरत्नस्तुतिः ॥

भूतस्य जात इति वारिरुहासनस्य
जातो बृहन्निति हरेश्च जनिः प्रसिद्धा ।
यस्माद्जात इति मन्त्रवरोपदिष्टा-
त्तं रुद्रमेव जनितश्चकितः प्रपद्ये ॥ १ ॥

कतिपयश्रुतिपुराणादिवचनापातपरामर्शप्रसक्तजगत्कारण-भावयोर्ब्रह्मनारायणयोरपि कारणतया कैमुतिकन्यायेन शिवस्य सकलजगत्कारणत्वं प्रथमं प्रसाध्यते । 'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्' इति कमलासनस्य, 'विष्णुरित्था परमस्य विद्वाञ्जातो बृहन्नभिपाति तृती-

यम्' इति कमललोचनस्य च प्रसिद्धा जनिर्यस्माद्रुद्राद्भवति। कथमवगम्यते रुद्राद्भवतीति? उच्यते। हिरण्यगर्भमन्त्रे तावत् 'अग्रे' इति विशेषणेन 'यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः। हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु॥' इति 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं हि देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥' इति च श्वेताश्वतरोपनिषन्मन्त्रार्थप्रत्यभिज्ञाता हंसेशदेवशिवहररुद्रेशानमहेश्वराद्यभिधानश्रुतिः शिवैकान्तिकीति प्रसाधितमस्माभिः शिवतत्त्वविवेकादिषु। अतस्तदर्थप्रत्यभिज्ञानात्कमलासनजनिस्तावच्छिवादित्यवगम्यते। 'विष्णुरित्था—' इति मन्त्रस्यायमर्थः— परमस्य परमेश्वरस्येत्थंभावेन विद्वान्वेदिता। विष्णोः परमेश्वरस्य वेदितृत्वं मन्त्रान्तरेऽपि प्रसिद्धम् 'विष्णो देव त्वं परमस्य वित्से' इति। एवंभूतो बृहन्महान्विष्णुः। बृहदिति विशेषणं व्यूहावतारादिरूपान्तरव्यावर्तनेनादिविष्णुरूपप्रसाधनार्थं मन्त्रान्तरेष्वपि प्रसिद्धम् 'नमो विष्णवे बृहते करोमि' 'बृहत्ते विष्णो सुमतिं भजामहे' इत्यादिषु। स विष्णुर्जातः सञ्शुद्धाशुद्धप्रपञ्चद्वयापेक्षया तृतीयं परमाकाशरूपं परमशिवलोकमभिपाति। व्यूहावताररूपा विष्ण्वंशभेदा हि शुद्धाशुद्धप्रपञ्चद्वयमपि संरक्षन्ति। परमशिवलोकं तु गोलोकस्योर्ध्वभागस्थिते परमशिवलोकप्रा-

रम्भरूपे परमपदे स्थितः साक्षादादिविष्णुरेव संरक्षति । तदेतत् 'ते ते धामान्युश्मसीगवध्य' इत्यादि श्रुतीतिहासपुराणादिवचनैरवगम्यत इति रत्नत्रयपरीक्षादिषु प्रसाधितमस्माभिः । एवं चात्र कस्माज्जात इत्याकाङ्क्षायाम् 'परमस्य विद्वान्' इत्यन्यार्थसंनिहितः परम एव तत्कारणत्वेनान्वेति, अन्यार्थसंनिहितस्याप्याकाङ्क्षयान्वयस्य 'अधिकं वा स्याद्वह्वर्थत्वादितरैः संनिधानात्' इत्यधिकरणसिद्धत्वात् । स परमो रुद्र इति कथमवसीयत इत्याकाङ्क्षायामजात इति मन्त्रवरोपदिष्टादिति विशेषणम् । 'अजात इत्येवं कश्चिद्भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम्' इति श्वेताश्वतरोपनिषन्मन्त्रेणाजातो रुद्र उपदिष्टः । ततश्च जातस्य विष्णोर्जनकाकाङ्क्षायां जातो हिरण्यगर्भादिरेव जनकत्वेनापेक्ष्यते चेत्तस्यापि जनकाकाङ्क्षा स्यादिति जनकान्तरनिराकाङ्क्षो रुद्र एव कारणत्वेन परिग्राह्यः, 'एकाहाद्वा तेषां समत्वात्स्यात्' इति न्यायात् 'न हि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके' इति तदधिकरणभाष्योदाहृतलौकिकन्यायाच्च । एवं ब्रह्मविष्ण्वादिसकलजनयिता स्वयं जनिरहितो रुद्र एव जननाद्भीतैः प्रपत्तव्य इति युक्तं तत्कतुन्यायात् 'अजातमिममेवैकं मत्वा जन्मनि भीरवः । रुद्रस्यास्य प्रपद्यन्ते रक्षार्थं दक्षिणं मुखम् ॥' इति तदनुसारिशिवपुराणव-

चनाच्च । तदेतदनुभूत्योक्तम् 'जनितश्चकितः प्रपद्ये' इति ॥

एवमुक्ता ब्रह्मनारायणयोः शिवाज्ञानिर्नैच्छिकी स्वतन्त्रा किं तु परतन्त्रेति दर्शयति—

उक्त्वा प्रसूतिमजशौरिहरेश्वराणां
संसूच्य दीपकसहोक्तिभिरन्यनिघ्नाः ।
तां संन्यधारयदथर्वशिखा हि यस्य
तं सर्वकारणमनादिशिवं प्रपद्ये ॥ २ ॥

अथर्वशिखोपनिषदि श्रूयते— 'सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणं कारणानां धाता ध्याता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरश्च शंभुराकाशमध्ये' इति । अत्रेन्द्रपदमीश्वरवाचि सदाशिवस्याप्युपलक्षणम् । सर्वमिदं जगत्सृष्टिस्थितिसंहारतिरोधानानुग्रहकर्तृब्रह्मविष्णुरुद्रेश्वरसदाशिवात्मकास्ते संप्रसूयन्ते, सर्वाणि चेन्द्रियाणि भूतैः सह संप्रसूयन्ते, न कारणमेतेषां कारणं शंभुर्न प्रसूयते । तं विशिनष्टि—कारणानां सृष्ट्यादिकर्तृणां ब्रह्मादीनां धाता पोषयिता, ध्याता सृष्टिसंकल्पकर्ता । अतः कारणं शंभुरेव मुमुक्षुभिर्ध्येय इति श्रुत्यर्थः । अत्र शंभुरेव ध्येयो न ब्रह्मादय इत्येतदुपपादनार्थं ब्रह्मादयः प्रसूतिम-

त्वेन निरूपयितुं प्रस्तुताः । अप्रस्तुतानि चेन्द्रियाणि । अतः प्रस्तुतानामप्रस्तुतानां च प्रसूतिरूपैकक्रियान्वयो दीपकालंकारः । सह भूतैरिति सहोक्तिरलंकारः । एताभ्यां सहोक्ति-दीपकाभ्यां भूतेन्द्रियाणामिव ब्रह्मादीनामपि जनिरन्यनिष्ठेति व्यज्यते । एतदर्थः पूर्वार्धेनोक्तः । न कारणमित्याद्यर्थ उत्तरार्धेन ॥ २ ॥

ननु 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानः' इत्यादिषु नारायणस्य ब्रह्मरुद्राभ्यां प्रथमभवनवर्णनं श्रूयते; तस्य कथं रुद्राज्जनिः स्यादित्याशङ्क्योदाहृताथर्वशिखावचनानुसारेण प्रथमभवनश्रुतेरर्थान्तरमाह—

वेदान्तेषु प्रथमभवनं वर्णितं यस्य याभ्यां
तद्वृत्तस्य प्रसववचसा जन्म तत्ख्यापयित्वा ।
यस्यैकस्य स्फुटमजनिता निश्चिता कारणस्य
ध्यायामस्तं जनिविहतये शंभुमाकाशमध्ये ॥

'एको ह वै नारायण आसीत' इत्यादिवेदान्तवाक्येषु यस्य नारायणस्य याभ्यां ब्रह्मरुद्राभ्यां प्रथमभवनं वर्णितं तद्वृत्तयोर्ब्रह्मरुद्रयोरिव नारायणस्य प्रसववचसा 'ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते' इति प्रसववचनेन तत्प्रथमभवनं

जन्म ख्यापयित्वा प्रथमजन्मरूपमिति प्रकाश्य यस्य शंभोरेकस्यैव जनिरहितता स्फुटं वर्णिता तं शंभुं जनिहानये हृदयाकाशमध्ये ध्यायाम इति योजना । एतदुक्तं भवति—अस्ति नित्यसत्तायामप्यासीदिति प्रयोगः, यथा 'सदेव सोम्येदमग्र आसीत्' इति । अस्ति च षड्भावविकारान्तर्भूतानित्यसत्तायां जन्मावस्थाविशेषरूपायाम्, यथा 'शक्तेरासीत्पराशरः' इति । इह जन्मश्रुत्यनुसाराद्वितीयार्थो ग्राह्यः । अथर्वशिखायां ब्रह्मविष्णुरुद्राणां भूतानामिव जन्ममात्रमुक्तम् । 'एको ह वै—' इत्यादिश्रुतौ नारायणस्य 'आत्मन आकाशः संभूतः' इत्यादिश्रुतावाकाशस्येव प्रथमजन्मोक्तमिति विशेषः । अत्रोपबृंहणजातं शिवतत्त्वविवेके प्रपञ्चेनोदाहृतम् । नन्वेवं सति 'अहमेकः प्रथममासम्' इति शिववचनेऽपि प्रथमभवनं प्रथमजन्म स्यादित्याशङ्क्याह यस्यैकस्येति । शिवस्य जननाभावोक्त्या तस्य प्रथमभवनं नित्यसत्तारूपं भवेदिति भावः । एवं ब्रह्मनारायणकारणभावसिद्धेन सकलजगत्कारणत्वेन शिवस्य परभावः समर्थितः ॥ ३ ॥

अथ ब्रह्मविष्णुरुद्रस्थितसृष्टिस्थितिसंहारोपयोगिशक्तिकोटिनियामकत्वसिद्धेन 'यतो वै—' इत्यादिब्रह्मलक्षणेन सकलजगन्नियन्तृत्वेन सुरादिसर्वाराध्यलिङ्गरूपत्वालिङ्गेन च तस्य

परभावं समर्थयते—

यद्भ्रूभङ्गैकवश्या विधिहरिगिरिशख्यातिदाः शक्तिकोट्यो
यद्वृत्या देवदेवाः सकलभुवनगाः संनियच्छन्ति विश्वम् ।
यल्लिङ्गं सर्वदेवासुरमनुजमुखैरर्च्यते विश्वरूपं
तस्मै नित्यं नमस्यां प्रवितनुत परब्रह्मणे शंकराय ॥

अत्र प्रथमपादार्थो वराहपुराणे त्रिशक्तिनिर्णयप्रकरणे दर्शितः— 'नव कोट्यस्तु चामुण्डाभेदा भिन्ना व्यवस्थिताः । या रौद्री तामसी शक्तिः सा चामुण्डा प्रकीर्तिता ॥ अष्टादश तथा कोट्यो वैष्णव्या भेद उच्यते । या सा तु राजसी शक्तिः पालनी सैव वैष्णवी ॥ या ब्रह्मशक्तिः सत्त्वस्था सानन्ता वै प्रकीर्तिता । एतासां सर्वभेदेषु पृथगेकैकशो धरे ॥ सर्वासां भगवान्रुद्रः सर्वगत्वात्पतिर्भवेत् । यावतीस्ता महाशक्त्यस्तावद्रूपाणि शंकरः ॥ कृतवांस्ताश्च भजते पतिरूपेण सर्वदा ॥' इति । द्वितीयपादार्थो देवव्रताख्यानां साम्नामाद्ये साम्नि दर्शितः । तत्र हि दिविषदोऽन्तरिक्षसदः पृथिवीषद इत्यादयो द्युप्रभृतिस्थानविशेषेषु स्थिताः परमेश्वरस्य गणनाथा वर्णिताः । अत एव 'दिव्या गणा बहुरूपाः पुराणाः' इति श्रुत्युक्तान्परमेश्वरस्य गणनाथान्प्रति प्रस्तुत्य प्रतिवचनम्—

'ते हि साक्षादिविषदो ह्यन्तरिक्षसदस्तथा। पृथिवीषद इत्येते देवा देवव्रतैः स्तुताः॥' इति। तेषां तत्तत्स्थानस्थितसकलभूतनियामकत्वमिति शिवपुराणादिषु प्रपञ्चितम्। देवव्रतेऽपि दिविषदादिपर्यायेषु प्रतिपर्यायमाद्यन्तयोर्देवदेवशब्दाभ्यासादेतत्सूचितम्। अत्र देवव्रते दिविषदादिपर्यायेण शुद्धमिश्रमलिनप्रपञ्चनं त्रेधा कृत्वा तेषु स्थिता रुद्रा नमस्कृताः। अप्सुषद इति पर्याये पातालस्थिताः, दिक्षुसद आशासद इति पर्याययोर्ब्रह्माण्डाद्बहिर्दिक्षु, विदिक्षु च स्थिता ब्रह्माण्डधारका रुद्रा नमस्कृता इति भेदः। शिवस्य लिङ्गं सर्वैरपि सुरासुरमनुष्यप्रभृतिभिः समाराध्यमिति निर्विवादम्। अत्र भारतवचनानि वामनपुराणादिवचनानि च बहुतराण्युदाहृतानि शिवतत्त्वविवेके। शिवलिङ्गस्य विश्वरूपत्वं शिवपुराणादिषु प्रतिपादितम्। शिवपुराणे हि वायुसंहितायां प्रणवमात्रात्रयप्रतिपाद्यं ब्रह्मविष्णुरुद्रप्रभृति समस्तं जगालिङ्गादुत्पद्यते लिङ्गे तिष्ठति लिङ्ग एव विलीयत इति लिङ्गस्य विश्वात्मकत्वं प्रपञ्चेन निरूपितम्। इदं च ब्रह्मलिङ्गं भवत्येव यदस्य लिङ्गं विश्वात्मकं सर्वैरपि देवादिभिः समाराध्यत इति। तथा हि— कठवल्लीषु 'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति' इति सर्वेषां प्राणिनां हृदयमध्यस्थितः परमात्मा निरूपितः। तस्य च 'ऊर्ध्वं प्राणमुन्नयत्यपानं प्र-

त्यगस्यति । मध्ये वामनमासीनं विश्वे देवा उपासते ॥' इति सर्वदेवोपास्यत्वमुक्तम् । तदुक्तिर्मनुष्याणां तदुपासने प्रवृत्त्यर्थेति तत एव मनुष्योपास्यत्वमपि सिद्धम् । अत एव ब्रह्ममीमांसायामपरिच्छिन्नस्य परब्रह्मणः कथमङ्गुष्ठमात्रत्वमित्याशङ्क्य 'हृद्यपेक्षया तु मनुष्याधिकारत्वात्' इति सूत्रेण मनुष्यहृदयाब्जकोशानामङ्गुष्ठपरिमाणत्वात्तदन्तरवकाशावच्छिन्नत्वेनाङ्गुष्ठपरिमाणत्वोक्तिं मनुष्याधिकारत्वाच्छास्त्रस्येति तत्समर्थनं कृतम् । हृदयाब्जकोशान्तरवकाशलब्धाङ्गुष्ठपरिमाणस्य लिङ्गाकारत्वमस्तीति तस्य लिङ्गरूपत्वसिद्धिः । स्पष्टं चास्य लिङ्गरूपत्वमाम्नातं हंसोपनिषदि— 'एषोऽसौ परमहंसो भानुकोटिप्रतीकाशो येनेदं व्याप्तं तस्याष्टधा वृत्तिर्भवति, पूर्वदले पुण्ये मतिः, आग्नेये निद्रालस्यादयो भवन्ति, याम्ये क्रौर्ये मतिः, नैर्ऋते पापे मनीषा, वारुण्यां क्रीडायाम, वायव्ये गमनादौ बुद्धिः, सौम्ये रतिप्रीतिः, ऐशाने द्रव्यादानम्, मध्ये वैराग्यम्, केसरे जाग्रदवस्था, कर्णिकायां स्वप्नः, लिङ्गे सुषुप्तिः, पद्मत्यागे तुरीयम्, यदा हंसो नादे विलीनो भवति तत्तुरीयातीतम्' इति। अत्र नादो हृदयाब्जकोशस्योपरि तिष्ठन्ननाहतनादो विवक्षितः, यो बहिरपि शिवलिङ्गस्योपरि तिष्ठन्प्रसिद्धः । तथा हि वायुसंहितायां महालिङ्गप्रादुर्भावे समाम्नायते— 'तत्राकारः श्रुतो

भागे ज्वालालिङ्गस्य दक्षिणे । उकारश्चोत्तरे भागे मकारस्तस्य मध्यतः । अर्धमात्रात्मको नादः श्रूयते लिङ्गमूर्धनि ॥' इति । न तु मूलाधारोद्यन्नादोऽत्र विवक्षितः, कर्णिकां विहायोपरिलिङ्गेन संबध्य लिङ्गं पद्मं च त्यक्त्वोपरि गच्छतो मूलाधारसंबन्धाप्रसक्तेः । एवं लिङ्गमूर्धनि लिङ्गस्यानाहतनादस्य 'एवं तिसृभिरेवैतं मात्राभिरखिलं त्रिधा । अभिधाय शिवात्मानं बोधयत्यर्धमात्रया ॥' इति शास्त्रोक्ततदीयरहस्यार्थानुचिन्तनसहितं यत्परिशीलनं तदेव नादानुसंधानमाचक्षते योगिनः । तस्माद्वंसोपनिषदैकार्थ्यापन्नकठवल्लीमन्त्रालोचनया विश्वात्मनादशिरस्कलिङ्गरूपत्वमपि ब्रह्मात्मैकान्तिकं तल्लिङ्गमिति ततोऽपि लिङ्गस्य परब्रह्मत्वसिद्धिरप्रत्यूहा ॥ ४ ॥

नन्वेतदपि यदि ब्रह्मलिङ्गं तर्हि 'शब्दादेव प्रमितः' इति ब्रह्मसूत्रे किमित्येतदप्यङ्गुष्ठमात्रपुरुषस्य परब्रह्मभावनिर्णायकत्वेन न सूत्रितम् ? न हि तत्र शब्दग्रहणं लिङ्गस्याप्युपलक्षणमिति वक्तुं शक्यम्, एवकारस्य निर्णायकान्तरासहिष्णुत्वादित्याशङ्क्याह--

आस्तां सूक्ष्मं लिङ्गरूपत्वलिङ्गं
स्याद्ब्रह्मेशानाख्ययैवाल्पमात्रम् ।

इत्येवेनावेदयत्सूत्रकारो
यं ब्रह्माख्यं तं प्रपद्ये महेशम् ॥ ५ ॥

'शब्दादेव' इत्येवकारो न निर्णायकान्तराभावद्योतनार्थः, किं तु निर्णायकान्तरपरामर्शप्रयासनैरपेक्ष्यद्योतनार्थः। तदयं सूत्रार्थः— आस्तामुपनिषदन्तरैकार्थपरामर्शप्रयत्नापेक्षं सूक्ष्मदृष्ट्यान्वेष्यं लिङ्गम्, ईशानशब्दादेव परब्रह्मवाचकादङ्गुष्ठमात्रः पुरुषः परं ब्रह्म भवतीति। एवं च परभावनिर्णायकेशानशब्दस्येतरसाहायकापेक्षां प्रतिक्षिपन्नेवकारस्तत्सद्भावं गमयेदिति तेनैव लिङ्गरूपत्वलिङ्गस्यापि सूत्रकाराशयस्थत्वसिद्धिः। न चेशानशब्दप्रतिपन्नसर्वैश्वर्यलिङ्गसद्भावगमकत्वेन तस्यान्यथासिद्धिः, तस्य श्रुतितः प्रागनुन्मेषणादित्युक्त्यैव तत्सिद्धेरेवकारप्रयोगसूचनीयत्वाभावात्। न ह्यपरामृष्टार्थः शब्दः कचिदर्थविशेषश्रुतिर्भवति। न चेशानशब्दः शिवरूपं ब्रह्म प्रत्याययन्यौगिकार्थस्यैश्वर्यस्य प्रत्यायने विलम्बते। प्रत्युताशु यौगिकार्थप्रत्यायनमेव शीघ्रं भावि न विलम्बि, ऐश्वर्यप्रतियोगिन ईशितव्यस्य भूतभव्यस्य प्रागुपात्तस्य बुद्धिस्थत्वात्। एवं सूत्रवत्तया शिवाभिधानश्रुत्याऽवधारणसूचितसद्भावेन लिङ्गरूपत्वलिङ्गेन चाङ्गुष्ठमात्रं ब्रह्म निश्चिन्वन्सूत्रकारः शिवं परं ब्रह्मेति व्यक्तीचकार। यत्तु 'मध्ये वाम-

नमासीनम्' इति श्रुतेन विष्णुवाचिना वामनशब्देनात्र निर्णयो विवक्षित इति तन्न, वामनशब्दस्य सामान्यतो विष्णुनामत्वाभावाद्विशेषतो मन्त्रप्रतिपाद्यहार्दनामत्वाभावाच्च । तस्योपेन्द्रावतारविशेषनामत्वेऽपि प्रकृते तदर्थग्रहणानपेक्षणाद्रूढ्यत्वसामान्यशक्त्यैव तन्नामत्वेन प्रयोगोपपत्तेर्विशिष्य तत्र शक्तिकल्पनायोगात्तत्कल्पकस्याभियुक्तनामकोशादेरभावात्कथंचित्कल्पनेऽपि प्रकृते परस्परसंनिहितप्राणापानमध्यवर्तित्वोक्त्या ह्रस्वत्वरूढेरेवोन्मेषणाद्रूढ्यन्तरानुन्मेषाच्च । तस्मादुदाहरणमन्त्रगतेन प्रसिद्धतरशिवनामरूढिकेनेशानशब्देनैवात्र निर्णयो विवक्षित इति सर्वं समञ्जसम् ॥ ५ ॥

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमद्वैतविद्याचार्यैः
श्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनुभिः श्रीमदप्पय-
दीक्षितसार्वभौमैर्विरचिता पञ्चरत्नस्तुतिः
सव्याख्या संपूर्णा ॥



6381
265(அபாகு)

SRI VANI
VILAS PRESS
SRIRANGAM.